॥ श्रीमते रामानन्दाय नमः ॥

श्रीराम भक्तिलता – पुष्प २

श्रीराम शतनाम स्तोत्रम्

15434

नरामादधिकं चित्पठनं जगति

तले

प्रकाशक– पं. बजरंगदास

प्रतियां १००० श्री रामानन्दाब्दं ३३

सतनामु पिरेम नंढ द्वारे जे सामुहों शिकारपुर में छप्यो ॥

* मंत्र परंपरा *

श्रीमते रामानंदाय नमः

इमां सृष्टिं समुत्पाद्य जीवानां हित काम्यया। आद्यां शक्तिं महादेवीं श्रीसीतां जनकात्मजाम्। तारकं मंत्र राजंतु श्रावया मास ईश्वरः। जानकी तुजगन्माता हनुमंतं गुणाकरम्। श्रावयामास नूनंस ब्रह्मणं सुधियां वरम। तस्मा ल्लेभे वसिष्ठर्षिः क्रमादस्मा दवातरत्। भूमौहि राम मंत्रोऽयं योगिनां सुखदःशिव। एवं क्रमं समादाय मंत्रराज परंपरा। भूमौ प्रचलिता नित्या सर्व लोक सुखप्रदा। यह श्रीवाल्मीकि संहिता में लिखी हुई श्रीरामानंद सम्प्रदाय की गुरू परंपरा है।

महर्षि वाल्मीकि शोध संस्थान
१५३५
अयोध्या

श्रियः श्रिये नमः

श्रीमते हनुमते नमः

अथ श्रीराम शतनाम स्तोत्रम्

श्रीमते रामानंदाय नमः

श्री व्यासउवाच- शृणु गांगेयवक्ष्यामि रामस्याद्भुतकर्म्मणः । नामाष्टकशतं पुण्यं त्रिषुलोकेषु विश्रुते ॥ १ ॥ कैलास शिखरे रम्ये नाना रत्न विचित्रिते। एकाग्रः प्रयतो भूत्वा विष्णु माराध्य भक्तितः ॥१॥ उप-विष्टस्ततो भोक्तुं पार्वतीं शंकरोऽब्रवीत् । पार्वत्येहि मया सार्धं भोक्तुं भुवन वंदिते

॥३॥ तमाह पार्वती देवी जप्त्वा नाम सह-
स्रकम् । ततो मोक्ष्याम्यहं देव भुज्यतां भ-
वता प्रभो ॥ ४ ॥ ततस्तां पार्वतीं प्राह
प्रहसन्परमेश्वरः । धन्यासि कृत पुण्यासि
विष्णु भक्तासि पार्वति । दुर्लभा वैष्णवी
भक्ति र्भागधेयं विनेश्वरि॥५॥ रकारादीनि
नामानि शृण्वतो मम पार्वतिामनः प्रसन्न
तामेति राम नामाभिशंकया ॥ ६ ॥ रमन्ते
योगिनोऽनंते सत्यानंदे चिदात्मनि । इति
राम पदे नासौ परब्रह्माभिधीयते ॥ ७ ॥
राम रामेति रामेति रमे रामे मनोरमे । स-
हस्र नाम ाभिस्तुल्यं राम नाम वरानने ।८।
रामेत्युक्का महादेवि भुंक्ष्व सार्धं मयाधुना ।

ततो रामेति नामोक्का सहभुंजीत पार्वती ततो भुक्का महादेवी पतिना सहसंस्थिता ॥ ९ ॥ पप्रच्छ श्रीमहादेवं प्रीति प्रवण मानसा। सहस्र नामभिस्तुल्यं रामनाम त्व-योदितम् ॥ १० ॥ तस्यान्यान्यपि नामानि संति चेद्वरणाद्विषः । कथ्यतां मम देवेश तन्मे प्रीतिरुत्तमा ॥११॥ श्री शिवउवाच-लौकिका वैदिकाः शब्दायेके चित्संति पार्वति । नामानि रामचंद्रस्य सहस्रंतेषु वाधिकम ॥१२॥ तेषु चात्यंत पुण्यंहि नाम्नामष्टोत्तरं शतम । विष्णोरेकैक नामापि सर्व वेदाधि-कंफलम् । तादृङ् नाम सहस्रेण राम नाम समंमनम् ॥१३॥ जपतः सर्व वेदांश्च सर्व

मंत्रांश्च पार्वति । तस्मात्कोटि गुणं पुण्यं राम नाम्नैवलभ्यते ॥१४॥

ॐ अस्य श्रीरामचंद्रस्याष्टोत्तर शतनाम्नां ईश्वर ऋषिः अनुष्टुप छन्दः श्रीराम चंद्रो देवता श्रीराम प्रीत्यर्थे जपे विनियोगः । श्रीरामो रामभद्रश्च रामचंद्रश्च शाश्वतः । राजी वलोचनः श्रीमान् राजेन्द्रो रघु पुंगवः ॥१॥ जानकी वल्लभो जैत्रो जितामित्रो जनार्दनः । विश्वामित्र प्रियो दान्तः शरण्या त्राण तत्परः ॥ २ ॥ वालि प्रमथनो वाग्मी सत्य वाक् सत्य विक्रमः । सत्य व्रतो व्रत-फलः सदाहनुमदाश्रयः ॥३॥ कौसलेयः खर-ध्वंसी विराध वध पंडितः । विभीषण परि-

भाता दशग्रीव शिरोहरः ॥४॥ सप्त ताल प्रभेत्ताच हरकोदण्ड खंडनः । जामदग्न्य महादर्प दमनस्तार कान्तकः ॥५॥ वेदान्त सारो वेदात्मा भव वैद्यश्च भेषजम् । पूषणा त्रिशिरो विश्वः त्रिमूर्ति स्त्रिगुणास्त्रयी ॥६॥ त्रिविक्रमस्त्रि लोकात्मा पुण्य श्रवण कीर्तनः । त्रिलोकि रक्षको धन्वी दण्डकारण्य वासकृत् ॥ ७ । अहल्या पावन श्चैव पितृ भक्तो वरप्रदः । जितेन्द्रियो जित क्रोधो जित लोभो जगद्गुरुः ॥८॥ ऋक्ष वानर संघाती चित्रकूट समाश्रयः । जयंत त्राण वरदः सुमित्रा पुत्र सेवितः ॥९॥ सर्व देवाधिदेवश्च मृत वानर जीवनः । माया मारी

चहंता च महाभोगो महाभुजः ॥१०॥ सर्व देवस्तुतः सौम्यो ब्रह्मण्यो मुनि सत्तमः । महायोगीश्वरो दारः सुग्रीवेप्सित दायकः सर्व पुण्याधिक फल स्तीर्थः सर्वाघ नाशनः आदि पुरुषो महा पुरुषः परमः पुरुषः परः ॥१२॥ पुण्योदयो दयासारः पुराणः पुरुषोत्तमः । स्मित वा क्त्रोमित भाषी पूर्व भाषी च राघवः । अनंत गुण गंभीरो धीरोदात्त गुणो भुवः । माया मानुष चारित्रो महादेवाभि पूजितः॥१४॥ सेतु कृज्जित वारीशः सर्व तीर्थ मयो हरिः । श्यामांगः सुन्दरः शूरः पीतवा सा धनुर्धरः ॥१२॥ सर्व यज्ञा धियपो यज्ञो जरा मरण वर्जितः । परमात्मा

परंब्रह्म सच्चिदानंद विग्रहः ॥ १६ ॥ परं-
ज्योतिः परं धामः पराकाष्ठा परात्परः । परेश
पारगः पारः सर्व वेदात्मकः शिवः ॥ १७ ॥
ॐ तत्सदिति रामस्य नाम्नामष्टोत्तरं शतम
। गुह्याद्गुह्य तरं देवि तवप्रीत्या प्रकाशि-
तम् ॥ १८ ॥ यः पठेच्छृणुयाद्वापि भक्तियो-
गेन चेतसा । स सर्वै मुच्यते पापैः कल्प
कोटि शतोद्भवैः ॥ १९ ॥ जलानि स्थलतां
यांति शत्रवो यांति मित्रताम् । राजानोव-
श्यतां यांति वन्हयो यांति शैत्यताम् ॥ २० ॥
अनुकूलं च भूतानिस्थैर्यं यांति चलाः श्रियः
। अनुग्रहं ग्रहा यांति शांति मायान्त्युपद्रवा
॥ २१ ॥ पठतो भक्ति भावेन जनस्य गिरि

संभवे । यः पठेत्पत्परया भक्तया तस्यवश्ये जगत्रयम् ॥ २२ ॥ यद्यत्कामयते चित्ते तत्तदाप्नोति कीर्तनात् । य पठेद्रामचंद्रस्य नाम्नामष्टोत्तरं शतम् ॥२३॥ पुण्य कालेषु सर्वेषु पठन्नानन्त्यप्नुयात् । ज्ञानेनापि च कुर्वाणो नसपापे न लिप्यते ॥ २४ ॥ सर्व वेदेषु तीर्थेषु दानेषु च तपः सुच । तत्फलं कोटि गुणितं स्तवेना नेन लभ्यते ॥ २५ ॥ अन्य कालेषु सर्वेषु पठेन्नाम शताष्टकम् । कल्प कोटि सहस्राणि कल्प कोटि शतानि च वैकुंठ वासमाप्नोति दश पूर्वे र्दशापरैः ॥२६॥ रामं दूर्वादल श्यामं पद्माक्षं पीतवाससम् । स्तुवंति नामभि दिव्यैर्नते संसा-

रिणो नराः ॥२७॥ रामाय रामभद्राय रा-
मचंद्राय वेधसे । रघुनाथाय नाथाय सीता-
याः पतये नमः ॥२८॥ इमं मंत्रं महादेवि
जपन्नेव दिवानिशम् । सर्व विनिमुक्तो वि-
ष्णु सायुज्य माप्नुयात् ॥२९॥ इत्येतद्राम
भद्रस्य महात्म्यं वेदसंमितम् । कथितं तव
गांगेय यतस्त्वं वैष्णवोत्तमः ॥३०॥ वंदा
महे महेशानं चंडको दण्ड खंडनम् । जा-
नकी हृदयानंद चंदनं रघुनंदनम् ॥३१॥

इति पद्मपुराणे शंकर गौरी संवादे
श्रीरामचंद्र स्तोत्रं संपूर्णं

॥ श्रीराम मंत्र महात्म्यम् ॥

श्रीमते रामानंदाय नमः

सूतउवाच- रामतीर्थं समुद्दिश्य वक्ष्यामि मुनि पुंगवाः । इतिहासं महापुण्यं सर्व पातक नाशनम् ॥१॥ सुतीक्ष्ण नाम विप्रेन्द्रो मुनि र्नियत मानसः । अगस्त्य शिष्यो रामस्य चरणाब्ज विचिंतकः ॥ २ ॥ रामचंद्र सरस्तीरे तपस्ते पे सुदुष्करम् । जपन् षडक्षरं मंत्रं रामचंद्राधि दैवतम् ॥ ३ ॥ नित्यं सपंच साहस्रं मंत्र राजमतंद्रितः । ज जाप कुर्वन्स्नानं च रघुनाथ सरोजले ॥४॥ भिक्षाशी नियताहारो जित क्रोधो जितेन्द्रियः । एवं सुतीक्ष्णो विप्रेन्द्राः बहुकाल मवर्तत

॥५॥ ततः कदाचित्स मुनी रामं ध्यायन्सदा हृदि। तुष्टा व सीता सहितं रामचंद्रं सभक्तिकम् ॥६॥ नमस्ते जानकीनाथ नमस्ते हनुमत्प्रिय। नमस्ते कौशिक मुनेर्याग रशण दीक्षित ॥ ७ ॥ नमस्ते कौसल्याय विश्वामित्र प्रियाय च। नमस्ते हरकोदण्ड भंजकामर सेवित ॥८॥ मारी चान्तक राजेन्द्र ताटका प्राण नाशन। कबंधारे हरे तुभ्यं नमो दशरथात्मज ॥ ९ ॥ जामदग्न्य जिते तुभ्यं खर विध्वंसिने नमः। नमः सुग्रीव नाथय नमो वालि हरायते ॥ १० ॥ विभीषण भय क्लेश हारिणे मलहारिणे। अहल्या दुःख संहर्त्रे नमस्ते भरताग्रज॥११

अम्भोधि गर्व संहर्त्रे तस्मै सेतु कृते नमः। तारक ब्रह्मणे तुभ्यं लक्ष्मणा ग्रजते नमः ॥ १२ ॥ रक्षः संहारिणे तुभ्यं नमो रावण मर्द्दिने । कोदण्ड धारिणे तुभ्यं सर्व रक्षा विधायिने ॥१३॥ इतिस्तुवन्मुनिः सोयं सुतीक्ष्णो राम मन्वहम् । निनाय कालम निशं रामचंद्र निषण्णधीः ॥१४॥ एवं मभ्य स्तस्तस्य राम मंत्रं षडक्षरम् । स्तुवतो रामचंद्रं च स्तोत्रेणानेन सुव्रताः ॥ १५ ॥ तीर्थे च रघुनाथस्य कुर्वतः स्नान मन्वहम् । अभवन्निश्चला भक्ती रत्मचंद्रे ऽति निर्मला ॥१६॥ अभूदद्वैत विज्ञानं प्रत्यागात्मैकलक्षणम । अनधीत त्रयी ज्ञानं तथैवा श्रुतवे-

दनम् ।१७॥ परकाय प्रवेशे च सामर्थ्य म-
भवद्विजाः । आकाश गमने शक्तिः कला
वैदग्ध्य मेवच ॥ १८ ॥ अश्रुतानां च शा-
स्त्राणा मभिज्ञानं विना गुरुम् । गमनं सर्व
लोकेषु प्रतिघात विवर्जितम् ॥१९॥ अर्ती
द्रियार्थ दृष्टृत्वं देवैः संभाषणं तथा । पि-
पीलिकादि जंतूनां वार्ता ज्ञानमपि द्विजाः
॥२०॥ ब्रह्म विष्णु महादेव लोकेषु गमनं
तथाचतुर्दश सु लोकेषु स्वाधीन गमनं तथा
॥२१॥ एतान्यन्यानि सर्वाणि योगिलभ्यानि
सत्तमाः । सुतीक्ष्णस्या भवन्विप्रा रामतीर्थ
निषेवणात् ॥२२॥ एवं प्रभावंतत्तीर्थं महा
पातक नाशनम् । महा सिद्धिकरं पुण्यमप

मृत्यु विनाशनम् ॥२३॥ भुक्ति मुक्ति प्रदं पुंसां नरक क्लेश नाशनम् । राम भक्ति प्रदं नित्यं संसारोच्छेद कारणम् ॥२४॥

राम मंत्रस्य महात्म्यं वक्तुं शेषोपिनक्षमः
इतः किमधिकं वक्ष्ये सर्व मंत्राधिकाधिकः
इति स्कान्दे ब्रह्मोतर खंडे सेतु महात्म्ये
अष्टादशोऽध्यायः

अथ संक्षिप्त रामाराधन पद्धतिः

श्रीमते रामानंदाय नमः ।

सीतानाथ समारंभां रामानंदार्य मध्यमाम् । अस्मदाचार्य पर्य्यन्तां वन्दे गुरु परंपराम् । इति गुरु परं परां नमस्कृत्य संकल्पं कुर्यात् । अद्य मासोत्तमे मासे अमुक मासे

अमुक पक्षे अमुक तिथौ अमुक वासरे अमुक नामाहं श्री सीताराम प्रीत्यर्थे षट् सहस्र संख्याकं श्रीमत्तारक मंत्र जपं करिष्ये। इति संकल्पं कुर्यात्। ॐ अस्य श्री मत्तारक ब्रह्म मंत्रस्य श्री जानकी ऋषिः। गायत्री छन्दः। श्री रामचन्द्रो देवता। रांबीजम्। नमः शक्तिः। रामायेति कीलकम्। श्री सीतारामचन्द्र प्रीत्यर्थे जपे विनियोगः। अथ ऋष्यादि न्यासान कुर्यात्। जानकी ऋषये नमः शिरसि। गायत्री छन्दसे नमो मुखे। श्रीराम देवतायै नमो हृदि। रांबीजाय नमो गुह्ये। नमः शक्तये नमः पादयोः। रामायेति कीलकाय नमः सर्वांगे।

अथ करन्यासः

रां अंगुष्ठाभ्यां नमः । रीं तर्जनीभ्यां नमः रूं मध्यमाभ्यां नमः रैं अनामिकाभ्यां नमः रौं कनिष्ठिकाभ्यां नमः । रः करतल कर पृष्ठाभ्यां नमः ।

अथ हृदयादि न्यासः

रां हृदयाय नमः रीं शिरसे स्वाहा । रूं शिखायै वषट् । रैं कवचायहम् । रौं नेत्र-त्रयाय वौषट् । रः अस्त्राय फट् ।

अथ अक्षर न्यासः

रां नमः शिरसि । रां नमो भ्रुवोर्मध्ये । मां नमो हृदि । यं नमो नाभौ । नं नमः

गुह्ये । मं नमः पादयोः । पदन्यासः । रां नमः शिरसि । गमाय नमो नाभौ । नमो नमः पादयोः । एवं न्यासान् कृत्वा मूलेनाचम्य प्राणायामं कुर्यात् ततः श्री सीता सहितं श्रीरामं ध्यायेत् मानसिकैः पंचोपचारैः पूजयेच्च । ततो श्री मंत्रं जपेत् । संपूर्णे जपे उत्तर न्यासान्विधाय । यदक्षर पदभ्रष्टं मात्राहीनं च यद्भवेद् । तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर । इति संप्रार्थ्य - गुह्याति गुह्य गोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वंगति परमेश्वरः ।

इति श्रीरामाय जपं समर्पयेत् ।

श्री रामार्पणमस्तु ।

॥ अथ तारक ब्रह्म महात्म्यम् ॥

हारिन संहिता। षडक्षरं दाशरथेस्तारकं ब्रह्म गद्यते सर्वैश्वर्य प्रदं नृणां सर्व काम फल प्रदम्। एतमेव परं मंत्रं ब्रह्म रुद्रादि देवताः। ऋषयश्च महात्मानो मुक्ताः जप्त्वा भवाम्बुधौ। एतन्मंत्रमगस्त्यस्तु जप्त्वा रुद्रत्व माप्नुयात्। ब्रह्मत्वं काश्यपो जप्त्वा कौशिक-स्त्वं मरेशताम। कार्तिकेयो मनुत्वं च इन्द्रा-कौ गिरि नारदौ। बाल खिल्यादि मनुयो दे-वता त्वं प्रपेदिरे। एषवै सर्व लोकाना मैश्वर्य स्य कारणम्। इममेव जपन्मंत्रं रुद्रस्त्रि पुर घातकः। ब्रह्म हत्या विनिर्मुक्तः पूज्यमानो ऽभवत्सुरैः। अद्यापि काश्यां रुद्रस्तु सर्वे

षांत्यक्त जीविताम । दिशत्ये तन्महा मंत्रं तारकं ब्रह्म नामकम । तस्य श्रवण मात्रेण सर्व एव दिवंगताः। श्रीरामाय नमो ह्येषस्तारक ब्रह्म नामकः। नाम्नां विष्णोः सहस्राणां तुल्य एव महामनुः । अनंता भगवन्मंत्रा नानेन तुसमाकृताः

नारद पुराणे १३ अध्यायः

श्री सनत्कुमार उवाच अथ रामस्य मनवो वक्ष्यन्ते सिद्धि दायकाः।येषा माराधनान्मर्त्यास्तरंति भवसागरम। सर्वेषु मंत्रवर्येषु श्रेष्ठं वैष्णव मुच्यते । गाणपत्येषु सौरेषु शाक्त शैवेष्व भीष्ठदम। वैष्ण वेष्वपि मंत्रेषु राम मंत्राः फलाधिकाः । गाणपत्यादि

मंत्रेभ्यः कोटि कोटि गुणाधिकाः । विष्णु शयास्थितो वन्हि रिन्दु भूषित मस्तकः । रामाय हृदयान्तोयं महा घौघ विनाशनः । सर्वेषु राम मंत्रेषु ह्यति श्रेष्ठः षडक्षरः । ब्रह्म हत्या सहस्राणि ज्ञाता ज्ञात कृतानिच । स्वर्णास्तेय सुरापान गुरु तल्पायुतानिच । कोटि कोटि सहस्राणि ह्युप पापोन यानि वै । मंत्रस्यो च्चारणात्सद्यो लयं यांति न संशयः । एवमगस्त्य संहितायां शिव संहितायां मेतत्सिद्धान्त पोषका अविकल रूपेण इमे एवश्लोकाः पठिताः संति । अतोऽत्रन लिख्यंते ।

॥ श्री राम ॥

॥ श्री राम नाम महात्म्यम् ॥

॥ श्रीमद्रामानंदान नमः ॥

ततः सा विश्व जननी पार्वती प्राह शंकरम् । इयं ते करगा नित्य मद्ध माला महेश्वर । त्वयाकिं जप्यते देव संदेह यति मे मनः । त्वमेकः सर्व भूताना मादिकृत्सकलेश्वरः । श्रमेण त्वं समायुक्तो श्वासोच्छ्वास परायणः । जपन्नपि महाभक्तया दृश्य से त्वं मयासदा । त्वत्तः परतरं किंचिद्य त्वं ध्याय मि चेतसा । तन्मे कथय देवेश यद्य हंदयिता तव । इति पृष्ट स्तदा शंभुरुवाचहरिसेवकः । हरेर्नाम सहस्राणां सारं ध्यायामि नित्य शः । जपामि राम नामां कमवतारं ससम-

मम् । चतुर्विंशति संख्या कान्प्रा दुर्भावान् हरेर्गुणान् । वेद सारमिदं नित्यं द्वयक्षरं सत तोद्यतम् । निर्मलं ह्यमृतं शांतं सद्रूपमसृ- तोपमम् । कलातीतं निर्वशगं निर्व्या पारं महत्परम् । विश्वाधारं जगन्मध्यं कोटि ब्र- ह्मांड बीजकम् । जडं शुद्धक्रियं वापि निरं- जनं नियामकम् । यद्ज्ञात्वा मुच्यते क्षिप्रं घोर संसार बंधनात् । जपतः पाप कोटीनां दावाग्नित्वं प्रजायते । एतदेव परं गुह्य मे- तदेव परं महः । एतद्धि दुर्लभं लोके लोक त्रय विभूषणम् । एतदेव परं ज्ञानं द्वयक्षर- स्य विचिंतनम् । चातुर्मास्ये विशेषेण ब्रह्मदं चिंतित प्रदं इदं रहस्यं वेदानां पुराणा-

नामनेकशः। स्मृती नामपि सर्वेषां ह्यघहर
स्य विचिंतनम । चिंतना देव मर्त्यानां सि-
द्धिर्भवति हीप्सिता । प्रकृतीनां च सर्वासां
न मंत्रो द्वादशाक्षरः। तासां मंत्रो राम नाम
ध्येयः कोट्यधिको भवेत् । रामेतिद्व्यक्षर
जपः सर्व पापापनोदकः। गच्छंस्तिष्ठ ञ्छ-
यानो वा मनुजो रामकीर्तनात् । इह निर्वर्त
तोयाति प्रान्ते हरि गणो भवेत् । रामेति
द्व्यक्षरो मंत्रो मंत्र कोटि शताधिकः। सर्वा
सां प्रकृतीनांच कथितः पाप नाशकः । चा
तुर्मास्येऽथ संप्राप्ते सोप्पनंत फल प्रदः ।
चातुर्मास्ये महापुण्ये लभ्यते भक्ति तत्परैः
। देव वन्निष्फलं तेषां यमलोकस्य सेवनम।

न रामादधिकं किंचित्पठनं जगतीतले । राम नामाश्रयायैवै न तेषां यम यातना । येच दोषा विघ्न करामृतका विग्रहाश्चये । राम नाम्नैव लयं यां तिना त्रकार्या विचारणा । रमते सर्व भूतेषु स्थावरेषु चरेषु च । अंतरात्म स्वरूपेण यच्चरामेति कथ्यते । रामेति मंत्र राजोयं भव व्याधि निषूदकः । रणे विजय दश्चापि सर्व कार्यार्थ साधकः । सर्व तीर्थ फलः प्रोक्तो विप्राणामपि कामदः । रामचंद्रेति रामेति रामेति समुदाहृतः । हृत्य क्षरो मंत्र राजोयं सर्व कार्य करो भुवि । देवा अपि प्रगायंति राम नाम गुणाकरम । तस्मा त्वमपि देवेशि राम नाम सदा जप ।

राम नाम जपे द्यौवै मुच्यते सर्व किल्बिषैः
। सहस्र नाम जं पुण्यं राम नाम्नैव जायते
चातुर्मास्ये विशेषेण तत्पुण्यं दशधोत्तरम्
। हीन जाति प्रजातानां मह दहनि पात-
कम्। रामोह्ययं विश्वमिदं समग्रं स्वतेजसा
व्याप्य जनांतरात्मा । पुनाति जन्मान्तर
पातकानि स्थूलानि सूक्ष्माणि हणा च्चदग्ध्वा
। इति स्कान्दे राम नाम महिम वर्णनं
२५६ अध्यायः ।

स्कान्दे वै. खंडे वैसाख म. २९ अध्यायः
रामेति द्व्यक्षरं नाम ददौ वेदाधिकं शु-
भम विष्णो रेकैक नामापि सर्व वेदाधिकं

मतम् । तेभ्यश्चानंत नामभ्योधिकं नाम्नां सहस्रकम् । तादृङ् नाम सहस्रेण राम नाम समंमतम् । तस्माद्रामेति तन्नाम जप व्या धिनिरंतरम् । ॥ श्री राम ॥

स्कान्दे धर्मा. खंडे अ. ३४

राम रामेति रामेति मंत्र मप्युच्चरंतिते । अशनेशयने पाने गमने चोपवेशने । सुखे वा प्यथवा दुःखे राम मंत्रं समुच्चरेत् । न-तस्य दुःख दौर्भाग्यं नाधि व्याधि भयं भ-वेत् । आयुः श्रियं बलं तस्य वर्द्धयंति दिने दिने । रामेति नाम्नामुच्येत पापाद्वै दारुणा दपि । नरकं नहि गच्छेत गतिं प्राप्नोति शा-श्वतीम् । श्री सीता राम

* हितोपदेश *

श्री राम ही सत चित् आनंद रूप पर-ब्रह्म है ईश्वर भी राम है परमेश्वर भी राम है। राम से परे और कोई परब्रह्म या पर-मेश्वर नहीं है श्रीराम ही की उपासना क-रनी चाहिये। ऐसा ही शास्त्रों का और भक्त महात्माओं का कथन है। जैसा कि, रमंते योगिनो. राम एव परंब्रह्म. यथा घ-टश्च कलशश्चैकार्थस्याभिधायकः। तथा ब्रह्म च रामश्च नूनमेकार्थ तत्परः। रामचंद्र के भजन बिन जो चह पद निर्वाण। ज्ञा-नवन्त अपि सोपिनर पशु बिन पूंछ वि-षाण। जो सुख को चाहे सदा तो शरण

महर्षि वाल्मीकि शोध संस्थान
15434
अयोध्या
(२८)

श्री राम की लेह । कहे नानक सुनरे मना दुर्लभ मानुष देह ॥ सब सुख दाता राम है दूसर नाहिन कोइ । कहे नानक सुनरे मना तेहि सुमरे गति होइ ॥ इत्यादि वचन हैं। इसी श्रीराम की उपासना श्री शिव जी ने भी की है जैसा कि, श्रीरामस्य मनुं काश्यांज जपा वृषभ ध्वजः । इत्यादि, इसी प्रकार ब्रह्मा आदिक और देवता भी श्रीराम की उपासना करते हैं, ऐसा शास्त्रों में लिखा है। इसी कारण देवों को भी दुर्लभ यह मनुष्य जन्म जो कि निर्हेतुक श्रीराम की कृपा से प्राप्त हुआ है पाकर अवश्य नाश होने वाले एक दिन ज़रूर छुड़ा लीये जाने वाले

सें श्रीराम में प्रेम उत्पन्न हो जाता है, प्रेम
से ही श्रीराम की प्राप्ति होती है प्रेम विन
राम की प्राप्ति कभी नहीं हो सकती, यह
निर्विवाद बात है। प्रेम हो गया तो कुछ
भी बाकी नहीं रहा, यदि राम से प्रेम न
हुआ तो सर्व साधनों के रहने पर भी कुछ
न हुआ। इसी कारण गुरू ने लिखा है कि
बिन सत्संग न हरि कथा ता बिन मोह न
भाग। मोह गये बिन राम पद होय न दृढ
अनुराग॥ निरतिशय आनंद प्रेम से ही
मिलता है। पं. बजरंगदास

Printed by Jairamdas Hotchand Chhabria at the
SATNAM Printing Press Nandha Dwara Street
Shikarpur Sind.

Published by Pardit Bajrangdas Charn Chanchira
(ie Chella) of Puj Pad Swami Shri Vishnudas
Basantdas) of Hyderabad Sind. at Present
Pujari Shri Dwarkanath Temple at Shikarpur Sin